# महाराजा

# जयचामराज ओडेयार्

# विरचित कीर्तनानि

*Compiled and typeset using LaTeX 2ε, DevanagariTeX(2.14), and pdfLaTeX, with Type I* velthuis dvng *fonts*

©July 2009

## कीर्तनानुक्रमणिका


*गणपति* . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ५
१ गजाननं गणपतिं भजेऽहम् . . . . . . . . . . . . . . . . . . ५
२ गं गणपते नमस्ते . . . . . . . . . . . . . . . . . . . . . . . ६
३ गं गणपते सदा नमस्ते . . . . . . . . . . . . . . . . . . . . ७
४ चिन्तय सदा वारणवदनम् . . . . . . . . . . . . . . . . . . ८
५ चिन्तयामि सततं हस्तिवदनम् . . . . . . . . . . . . . . . . ९
६ परिपाहिमां सिद्धिविनायक . . . . . . . . . . . . . . . . . १०
७ पाहि मां श्रीपञ्चमातङ्गवदन . . . . . . . . . . . . . . . . ११
८ भजरे रे भज मानस . . . . . . . . . . . . . . . . . . . . . १२
९ महागणपतिं भजेऽहं . . . . . . . . . . . . . . . . . . . . . १३
१० लम्बोदर पाहि माम् . . . . . . . . . . . . . . . . . . . . . १४
११ श्रीमहागणपतिं भजेऽहं . . . . . . . . . . . . . . . . . . . १५
*शिव* . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . १६
१२ जगत्पते दक्षिणामूर्ते . . . . . . . . . . . . . . . . . . . . १६
१३ नागलिङ्गमहेश्वरम् . . . . . . . . . . . . . . . . . . . . . १७
१४ नीलकण्ठं महादेवम् . . . . . . . . . . . . . . . . . . . . . १८
१५ भैरवं भावयेऽहं . . . . . . . . . . . . . . . . . . . . . . . १९
१६ मृत्युंजयं भावयेऽहम् . . . . . . . . . . . . . . . . . . . . २०
१७ वामदेवं भावयेऽहम् . . . . . . . . . . . . . . . . . . . . . २१
१८ शिव शिव शिव भो . . . . . . . . . . . . . . . . . . . . . . २२
१९ श्रीगुरु दक्षिणामूर्ते . . . . . . . . . . . . . . . . . . . . . २३
२० श्रीजालन्धरम् . . . . . . . . . . . . . . . . . . . . . . . . २४
२१ श्रीदक्षिणामूर्ते नमोस्तु ते . . . . . . . . . . . . . . . . . २५
२२ श्रीनागलिङ्गमुपास्महे . . . . . . . . . . . . . . . . . . . . २६
२३ श्रीलिङ्गराज नमोस्तु ते . . . . . . . . . . . . . . . . . . . २७
२४ सदाशिवमुपास्महे . . . . . . . . . . . . . . . . . . . . . . २८
२५ स्वामिनाथ पालय मां सदाशिव . . . . . . . . . . . . . . . २९
२६ हाटकेश्वरं भजेऽहं . . . . . . . . . . . . . . . . . . . . . . ३०
*विष्णु* . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३१
२७ पद्मनाभं भजेऽहम् . . . . . . . . . . . . . . . . . . . . . . ३१
२८ बालकृष्णं भावयेऽहम् . . . . . . . . . . . . . . . . . . . . ३२
२९ भज गोविन्दम् . . . . . . . . . . . . . . . . . . . . . . . . ३३
३० श्रीरङ्गनाथ पाहिमां . . . . . . . . . . . . . . . . . . . . . ३४
*सरस्वति* . . . . . . . . . . . . . . . . . . . . . . . . . . . . ३५

| | | |
|---|---|---|
| ३१ | वन्देऽहं सदा शारदाम् | ३५ |
| ३२ | सरस्वतीं भगवतीम् | ३६ |
| | *लक्ष्मि* | ३७ |
| ३३ | कमलाम्बिके मामव | ३७ |
| ३४ | कामाक्षीं वरलक्ष्मीम् | ३८ |
| ३५ | परिपाहि मां श्रीवरलक्ष्मि | ३९ |
| ३६ | पाहि मां वरलक्ष्मि | ४० |
| ३७ | क्षीरसागरशयन | ४१ |
| | *देवि (पार्वति)* | ४२ |
| ३८ | अम्ब विन्ध्याचलवासिनि | ४२ |
| ३९ | अम्बा श्रीराजराजेश्वरि | ४३ |
| ४० | अम्बुजाक्षि पाहि माम् | ४४ |
| ४१ | उमां नमामि | ४५ |
| ४२ | ओ जगदम्ब | ४६ |
| ४३ | कामाक्षि पाहि मां मीनाक्षि | ४७ |
| ४४ | कामाक्षि पाहि मां हरार्धाङ्गदेशाक्षि | ४८ |
| ४५ | कामेश्वरीम् | ४९ |
| ४६ | गौरि मनोहरि | ५० |
| ४७ | चामुण्डेश्वरि पालय माम् | ५१ |
| ४८ | चिन्तयामि जगदम्बाम् | ५२ |
| ४९ | चिन्तयामि सततम् | ५३ |
| ५० | जगन्मोहिनीं हरमोहिनीम् | ५४ |
| ५१ | देवि श्रीमीनाक्षि | ५५ |
| ५२ | दुर्गादेवि संरक्ष माम् | ५६ |
| ५३ | नादरूपिणीम् | ५७ |
| ५४ | परिपाहि माम् | ५८ |
| ५५ | परिपाहि मां सदा परदेवते | ५९ |
| ५६ | पाहि मां सततम् | ६० |
| ५७ | पाहि मां श्रीपरमेश्वरि | ६१ |
| ५८ | पाहि मां श्रीराजराजेश्वरि | ६२ |
| ५९ | बाले बृहत्सृष्टिमूले | ६३ |
| ६० | बृहन्नायकि | ६४ |
| ६१ | ब्रह्माण्डवलये माये | ६५ |
| ६२ | भजरे रे मानस | ६६ |
| ६३ | भुवनेश्वरि | ६७ |

| | | |
|---|---|---|
| ६४ | भूरिभाग्यलहरि | ६८ |
| ६५ | मनोन्मणी माम वतु | ६९ |
| ६६ | महात्रिपुरसुन्दरि | ७० |
| ६७ | महिषासुरमर्दिनि | ७१ |
| ६८ | मातङ्गकन्याम् | ७२ |
| ६९ | मानयत मञ्जुळवाग्विलासाम् | ७३ |
| ७० | राजराजेश्वरीं आश्रयेऽहम् | ७४ |
| ७१ | राजराजेश्वरीं भावयेऽहम् | ७५ |
| ७२ | वन्दे जगदम्बिके | ७६ |
| ७३ | वन्देऽहं शिवे | ७७ |
| ७४ | विजयतां श्रीराजराजेश्वरि | ७८ |
| ७५ | विन्ध्याचलनिवासिनि | ७९ |
| ७६ | विमलाम्बिके | ८० |
| ७७ | शङ्करि सदानन्दलहरि | ८१ |
| ७८ | श्रीगायत्रीदेवि | ८२ |
| ७९ | श्रीचक्रपुरनिवासिनि | ८३ |
| ८० | श्रीचामुण्डेश्वरि देवि | ८४ |
| ८१ | श्रीचामुण्डेश्वरीं भज रे | ८५ |
| ८२ | श्रीचामुण्डेश्वरीं भजेऽहम् | ८६ |
| ८३ | श्रीराजराजेश्वरि | ८७ |
| ८४ | श्रीराजराजेश्वरि | ८८ |
| ८५ | श्रीराजराजेश्वरीम् | ८९ |
| ८६ | श्रीललिताम् | ९० |
| ८७ | श्रीललिते | ९१ |
| ८८ | श्रीविद्यामोदिनी | ९२ |
| ८९ | श्रीविद्यां ललिताम् | ९३ |
| ९० | श्रीविद्ये पाहि | ९४ |
| ९१ | सुज्ञानदायिनीम् | ९५ |
| ९२ | सुरनन्दिनीम् | ९६ |
| ९३ | सुवर्णाङ्गि राजमातङ्गि | ९७ |

# गणपति

## १ गजाननं गणपतिं भजेऽहम्

रागं हनुमतोडि ताळं : चतुरश्र मठ्यम्

*पल्लवि*

गजाननं गणपतिं भजेऽहं
कुमाराग्रजं कलासदनम्

*अनुपल्लवि*

गङ्गाधरतनूजं श्रीविद्यापुत्रं
गुणगणभरितं गणाधिपं गणितशास्त्रचतुरम्

*चरणम्*

परादिचत्वारिवाक्प्रतिपादितं
हरादिसुरोत्तमोपासितं एकदन्तम्
पुरा प्रकृतिपुरुषसृष्टिप्रथमाविर्भवं
पारिजाततरुरिवसकलभक्ताभीष्टदम्

*मध्यमकाल साहित्यम्*

महापापसंहारविक्रमं
महदहन्तादिसमग्रतत्त्वस्वरूपम्
मदोत्कटकुम्भस्थलशोभितं
मङ्गळकर ऐरावतैभं विघ्नराजम्

✠ ✠ ✠ ✠ ✠

# २ गं गणपते नमस्ते

रागं : दूर्वाङ्कि ताळं : त्रिश्र त्रिपुट

*पल्लवि*

गं गणपते नमस्ते
गन्धानुलिप्तसर्वाङ्गयुत

*अनुपल्लवि*

गङ्गाधरसंमोदित गङ्गाजलाभिषिक्त
गाङ्गेयरत्नाभरणभूषित गन्धर्वगानासक्त

*चरणम्*

सिद्धयोगिसुरमुनिवन्दित
बुद्धिदायक सुविभवयुत
सिद्धिकर श्रीविद्या पालित
शुद्धमति वरप्रदानतर
भाद्रपदशुक्लचतुर्थीमहित
दूर्वाङ्कि रागतोषित

✠ ✠ ✠ ✠ ✠

# ३ गं गणपते सदा नमस्ते

रागं नागस्वरावळि    ताळं : खण्ड त्रिपुट

*पल्लवि*

गं गणपते सदा नमस्ते

*अनुपल्लवि*

गङ्गाधरसुत गर्गमुनिनुत
गङ्गानदीतटनिवासरत
गम्भीरमेघध्वनियुत शुभदचरित

*चरणम्*

मुरारिप्रमुखादिसंसेवित
परादिचत्वारिवाग्विभुषित
पुरारिचरणकमलसेवानिरत
सुरासुरादिसन्नुत श्रीविद्या तोषित

*मध्यमकाल साहित्यम्*

नादब्रह्मसंजात नाहंजीवोहंब्रह्मास्मीतिप्रतिपादित सु-
नाद नागस्वरावळि विभूषित सोहंभावसहित्येकदन्तं

✠ ✠ ✠ ✠ ✠

# ४ चिन्तय सदा वारणवदनम्

रागं : सिन्धुरामक्रिय  ताळं : देशादि

*पल्लवि*

चिन्तय सदा वारणवदनं
चित्तपराशक्तिसहितमेकदन्तम्

*अनुपल्लवि*

सततं महामुनिनुतचरणम्

*मध्यमकाल साहित्यम्*

चिन्तितार्थफलदायकचिदानन्दं
चित्प्रकाशकृतिनिपुणम्

*चरणम्*

अनन्तानन्तसुगुणसान्द्रं
अनादिश्रीगुरुस्वरूपधरम्
अनित्यव्यवहारबन्धननिवारकं
आनन्दकरमोक्षपददायकम्[१]

*मध्यमकाल साहित्यम्*

परतत्वप्रतिपादितप्रणवस्वरूपं श्रीविद्या त्मजं
परादिचत्वारिवाक्प्रतिपादितं सिन्धुरामक्रिया तिहितं

✠ ✠ ✠ ✠ ✠

[१]मोक्षप्रदाननिपुणम्

# ५ चिन्तयामि सततं हस्तिवदनम्

रागं : वीरवसन्तम् ताळं : चतुरश्र अट

*पल्लवि*

चिन्तयामि सततं हस्तिवदनं
पराशक्तिसहितम्

*अनुपल्लवि*

चित्प्रकाशकं चिदानन्दकरपादपद्मम्

*मध्यमकाल साहित्यम्*

चिन्त्याचिन्त्यातीतं ज्ञानानुदयितं
ब्रह्माण्डकोटिवन्दितं वीरवसन्त रागहितम्

*चरणम्*

कुमाराग्रजं श्रीविद्या कौमारीसुतं
कुम्भसम्भवादिसकलमुनिविनुतवक्रतुण्डम्
कामरिनयनाह्लादकरं अतिपवित्रचरितं
कुङ्कुमसदृशकुसुमशोभितविधृतेक्षुदण्डम्

*मध्यमकाल साहित्यम्*

कमनीयगात्रं मूलप्रकृतिपुरुषसुखकरं
सर्वविघ्ननिवारणलम्बोदरं वारं वारम्

✠ ✠ ✠ ✠ ✠

# ६ परिपाहिमां सिद्धिविनायक

रागं : वकुळाभरणम्  ताळं : आदि

*पल्लवि*

परिपाहिमां सिद्धिविनायक
हरिहरब्रह्मादित्रिंशत्तिकोटिदेवतोपासित

*अनुपल्लवि*

परात्पर धीर पाशाङ्कुशधर
हरिद्राकुंकुमसंमिश्रितचन्दनानुलिप्तगात्र

*चरणम्*

गन्धर्वयक्षकिन्नरादिसेवित
गम्भीरध्वनिशोभितकरुणान्वित
गमनागमनरहित श्रीविद्या सुत
आगमसहित वकुळाभरणतोषित

*मध्यमकाल साहित्यम्*

गकार[२]बीजाक्षरनिलय भूम्यादि-
तत्त्ववलय भृतभक्तनिचय

✠ ✠ ✠ ✠ ✠

[२]ओंकार

# ७ पाहि मां श्रीपञ्चमातङ्गवदन

रागं सुप्रदीपम्  ताळं : सङ्कीर्ण त्रिपुट

*पल्लवि*

पाहि मां श्रीपञ्चमातङ्गवदनगणपते
पर्वतराजकुमारीसुकुमार सदा नमस्ते

*अनुपल्लवि*

देहि मे सद्बुद्धिं सर्वकार्येषु सिद्धिं
साहित्यादिसकलशास्त्रप्रकाशकर लम्बोदर
अहितदूरीकरणचतुर दीनमन्दार अनन्तानन्दमहिमाकर
अनादि श्रीविद्या रूपधर श्रीकर

*चरणम्*

क्षित्यादिशिवान्तषट्त्रिंशतत्त्वदर्शनविख्यात
सत्यं ज्ञानमनन्तेत्यादिवेदवाक्प्रतिपादित
मर्त्यलोकनिवासिनां अगाधभवसागरतार
कर्तृत्वाद्युपाधिरहित सिद्धिविनायक शुभदायक
क्षितिजादिसंसेवितक्षिप्रप्रसादकर सुप्रदीप -
स्वप्रकाश सच्चिदानन्दरूप सद्भक्तहितकर

✠ ✠ ✠ ✠ ✠

# ८ भजरे रे भज मानस

रागं भानुचन्द्रिक ताळं : रूपकम्

*पल्लवि*

भजरे रे भज मानस सिद्धिविनायकं सदा

*अनुपल्लवि*

भवानीसुतं सिद्धिदायकं सिद्धसाध्यसेवितम्

*चरणम्*

विद्यो पासकवश्यं पद्ममित्रं विद्या धिपं
सद्योजातादिपञ्चब्रह्मात्मकं अनवद्यम्

*मध्यमकाल साहित्यम्*

विरागचूडामणिं भक्तचिन्तामणिं
भानुचन्द्रिक प्रियं सामजवदनं सदयम्

✠ ✠ ✠ ✠ ✠

# ९ महागणपतिं भजेऽहं

रागं : अमृतवाहिनि ताळं : आदि

*पल्लवि*

महागणपतिं भजेऽहं
मातङ्गमुखं मूषकवाहम्

*अनुपल्लवि*

षण्मुखाग्रजं षडाधार-
षड्विध[३]जपचक्रनिवासिनम्
शीघ्रवरप्रसाददं शिल्पशास्त्रविशारदं
शीलशिरोमणिम्

*चरणम्*

सिद्धगणादिसंसेवितं सुरासुरपूजितं शिवसुतं ॥ १॥

विघ्ननाशकं विरागिणं विदेहमुक्तेश्वरं
धीर[४]चूडामणिम् ॥ २॥

सद्योजातोपासकप्रमथनाथं
सुधामधुरभाषिणम् ॥ ३॥

श्रीगुरुचित्प्रभानन्ददायकं
श्रीविद्या नागलिङ्गवरसुतम् ॥ ४॥

✠ ✠ ✠ ✠ ✠

[३]षट्पथ
[४]वीर

# १०   लम्बोदर पाहि माम्

रागं नारायणगौळ     ताळं : मिश्र त्रिपुट

*पल्लवि*

लम्बोदर पाहि मां हरनयनानन्दकर
अम्बावरजात श्रीविद्या मोदकर श्रीकर

*अनुपल्लवि*

लङ्केशापहृतकैलासलिङ्गप्रदायक

*मध्यमकाल साहित्यम्*

लं-गणपतये नमस्तेति महामन्त्रसंबोधित
प्रकृतिपुरुषप्रथमाविर्भूतगात्र

*चरणम्*

परमाद्वैतमार्गरत योगिहृदयस्थित
परादिचत्वारिवाक्परिमित परमपदशोभित
भरद्वाजगौतमात्रिमुनिपुंगवार्चित
भार्गवीतटवासित दुण्डीनामसुविख्यात

*मध्यमकाल साहित्यम्*

पारिजाततरुरिवानन्तानन्दफलप्रदाननिरत
श्री नारयणगौळसन्नुत

✠ ✠ ✠ ✠ ✠

# ११ श्रीमहागणपतिं भजेऽहं

रागं अठाणा ताळं : आदि

*पल्लवि*

श्रीमहागणपतिं भजेऽहं
शिवात्मजं षण्मुखाग्रजम्

*अनुपल्लवि*

सिद्धगण सेवितं विघ्ननाशकं
शीघ्रवरप्रसाददायकम्

*मध्यमकाल साहित्यम्*

सदयं कपिलमुनिवरदायकं
गुरुसेवासक्तं हेरम्बम्

*चरणम्*

ज्ञानमुद्रालङ्कृतं मूलाधारनिवासिनम् ॥ १॥
गजारण्यवासिनं ज्योतिर्मयं उपनिषत्सारं
पञ्चभूतात्मकं सिन्धूरप्रियं पञ्चमातङ्गमुखम् ॥ २॥
कामेशनयनाह्लादकं नागलिंगवरपुत्रं
श्रीविद्या चित्प्रभानन्दराजयोगीन्द्रवन्दितम् ॥ 3॥

✠ ✠ ✠ ✠ ✠

# शिव

## १२ जगत्पते दक्षिणामूर्ते

रागं : सूर्यकान्तम्     ताळं : खण्ड त्रिपुट

*पल्लवि*

जगत्पते दक्षिणामूर्ते नमस्ते
भर्गशब्दबोधितसदाशिवपरब्रह्ममूर्ते

*अनुपल्लवि*

नागराजालङ्कृत नारदादिसन्नुत
निर्गुणोपासनसुप्रीत श्रीगुरुगुहादि-
सकलपरिवारसुशोभित

*चरणम्*

नमःशिवाय साम्बाय रुद्रायेति-
नामोच्चारणमात्रेण कैवल्यप्रदान
सकलपरिवारसुशोभित
गुरोरधिकमित्यादिशैवरहस्यप्रमित
दशाङ्गुलस्थानस्वप्रकाशविराजित
निगमविदित श्रीविद्या सहित
सूर्यकान्त रागरञ्जिताद्यन्तरहित

✠ ✠ ✠ ✠ ✠

# १३ नागलिङ्गमहेश्वरम्

रागं : धीरशङ्कराभरणम्   ताळं : त्रिश्र झम्पे

*पल्लवि*

नागलिङ्ग महेश्वरं
भजमानस सन्ततम्

*अनुपल्लवि*

नागराजादिभक्त शङ्कराभरण युतं
नगात्मजासहितं अगस्त्यमुनिसंपूजितं
नागचर्माम्बरयुतं आगमादिसुविदितम्

*चरणम्*

सुन्दरमधुरापुराधीश्वरं सोमेश्वरं
इन्द्रादिसकलसुरसन्तोषकरं परात्परम्
सुन्दरवदनं प्रणतसज्जनार्तिहरं वरं
इन्द्राक्षीललितात्रिपुरसुन्दरीमनोहरं
सुधीन्द्रनुत श्रीविद्या महामन्त्रेश्वरम्

✠ ✠ ✠ ✠ ✠

# १४ नीलकण्ठं महादेवम्

रागं : गमकक्रिय ताळं : खण्ड त्रिपुट

*पल्लवि*

नीलकण्ठं महादेवं नमामि
बालकोटिसूर्यसमप्रभान्वितम्

*अनुपल्लवि*

बालाम्बिकामनोहरं शंकरं
फालनेत्रं शशाङ्कशेखरम्
मलयध्वजादिपाण्ड्यनृपवंश-
मानरक्षकं मार्कण्डेयपालकम्

*चरणम्*

मधुरापुरिनिलयश्रीसुन्दरेश्वरं
मधुरगमकक्रियादिनुतगानासक्तम्
साधुजनमोहनकरकैलासस्थितं
सिद्धसाध्यसेवित श्रीविद्यासहितम्
आदिव्याधिहरब्रह्मरन्ध्रानिल-
गमनतत्परपरमहंससुखकरम्

✠ ✠ ✠ ✠ ✠

# १५ भैरवं भावयेऽहं

रागं : भैरवम्    ताळं : चतुरश्र त्रिपुट

*पल्लवि*

भैरवं भावयेऽहं सततं
भवभयहरं भासुरं भूसुरविनुतम्

*अनुपल्लवि*

भवानीपतिं बृहत्त्वयुतं
भुवनमित्रं भरद्वाजपक्षिमोक्षकरम्

*चरणम्*

अखण्डचन्द्रमण्डलाकारं
अखण्डयज्ञरूपधरं शङ्करम्
अरुणाचलेश्वरं महेश्वरं
अर्कपुष्पमालाधरं हरम्
दक्षब्रह्ममखध्वंसकं दक्षिणामूर्तिं तारकं
धर्मराजदर्पहरं परं
दधीचकैवल्यदातारम्

✠ ✠ ✠ ✠ ✠

# १६ मृत्युंजयं भावयेऽहम्

रागं : रागवर्धनि  ताळं : खण्ड त्रिपुट

*पल्लवि*

मृत्युंजयं भावयेऽहं सदा
मृकण्डुमुनिसुतप्राणसंरक्षकम्

*अनुपल्लवि*

मृत्युभयध्वंसकं त्र्यम्बकं
मृगपक्षिमानवादिसकलचराचर-
प्रपञ्चपालकं त्रिपुरान्तकम्

*चरणम्*

वसिष्ठादिमहामुनिपूजितं
वासरेशचन्द्राग्निनेत्रयुतम्
भसिताङ्गाष्टभैरवादिरूपं
भवपाशभयहरणनिजस्वरूपम्
श्रीसिद्धिविनायकादिसहितं
रागवर्धनि तोषितं श्रीविद्या र्चितम्

✠ ✠ ✠ ✠ ✠

# १७ वामदेवं भावयेऽहम्

रागं : वागदीश्वरि ताळं : आदि

*पल्लवि*

वामदेवं भावयेऽहं
वागधीश्वरी नुतपदाम्बोरुहम्

*अनुपल्लवि*

वामाङ्कगौरीशोभितं
वागर्थादिप्रतिपादितम्
सामगानासक्तं सद्भक्त-
जनाभीष्टदाननिरतं सततम्

*चरणम्*

कालातीतं कलाप्रतिपादितं
कामारीतिख्यातं कृपान्वितम्
बालसुब्रह्मण्यादिविनुतं
भूपालसमुदायसंसेवितम्
बालात्रिपुरसुन्दरी श्रीविद्या-
मोदकं भवभयहरम्

✠ ✠ ✠ ✠ ✠

# १८ शिव शिव शिव भो

रागं : नादनामक्रिया  ताळं : मिश्र झम्पे

*पल्लवि*

शिव शिव शिव भो महादेव शम्भो
शिवारमण ममापराधं क्षमस्व

*अनुपल्लवि*

शर्व सर्वानन्दकर अखिलाण्डप्रभो
भवसागरतारक अक्षयलिङ्गविभो

*चरणम्*

नमस्ते स्थाणो प्रळयकालजगद्रक्षक[५]
नमकचमकप्रकटितरुद्रसूक्ततोषित
कामारे त्रिपुरारे कुम्बोद्भवस्तुतिपात्र
कामेश्वरीवल्लभ कुभेरमित्र
कपाली कालभैरवेतिविख्यात
श्रीविद्या विनुत नादनामक्रिया तोषित

✠ ✠ ✠ ✠ ✠

[५] रक्षक

# १९ श्रीगुरु दक्षिणामूर्ते

रागं : भवप्रिय ताळं : चतुरश्र मठ्यम्

*पल्लवि*

श्रीगुरु दक्षिणामूर्ते नमोस्तु ते
श्रीमदुमापते तारकरूपपशुपते

*अनुपल्लवि*

श्रीगिरिजाविहारिणे अनन्तरूपिणे
सद्गुरुशिष्यरूपप्रपञ्चव्यापिने
श्रीविद्या स्वरूपिणे अविकारिणे

*चरणम्*

योगपट्टाभिराममहामायावन्दित
त्यागराजादिमहाकविपुङ्गवसेवित
योगाङ्गसुप्रीत भवप्रिय रागतोषित
त्यागेनैके अम्रतत्वमानाशुरिति श्रुतिविदित
अगोचरमहातेजोज्ज्वालावृत
अघोराद्यष्टनामसंपूजित अमरनुत

✠ ✠ ✠ ✠ ✠

# २० श्रीजालन्धरम्

रागं : गम्भीरनाट   ताळं : आदि

*पल्लवि*

श्रीजालन्धरमाश्रयाम्यहं जलजाक्षम्

*अनुपल्लवि*

श्रीजाह्नवीधरं शंकरं
श्रीविद्या स्वरूपं शशिधरम्
श्रीवासं शर्वं शिवारमणं
मणि[६]गणवरभूषणम्
श्रितजनानन्ताभीष्टफलदं
श्रीसदाशिवमनिशम्

*चरणम्*

पुरा देवताकार्यार्थं त्रिपुरदहन[७]कारकं त्र्यम्बकं
मुरारिदेवोत्तमपूजितादिपवित्रपादयुगळयुक्तम्[८]
तारकवधार्थं महासेनरूपधरं देवादि[९]प्रमुखं
हराद्यखिलनामप्रतिपाद्यं हंसं जगद्व्यापकमनन्तम्
पुरन्दरादिसन्नुत गम्भीरनाट्य प्रदर्शकनागलिङ्गं
मरकतमणिशोभितलिङ्गं तारकतेजोरूपवायुलिङ्गम्

✠ ✠ ✠ ✠ ✠

[६]फणि
[७]दाह
[८]युग्मम्
[९]AevAED

# २१ श्रीदक्षिणामूर्ते नमोस्तु ते

रागं : सौराष्ट्रम्  ताळं : मिश्र त्रिपुट

*पल्लवि*

श्रीदक्षिणामूर्ते नमोस्तु ते भगवते
श्रितभक्तभोगमोक्षदानदक्ष विरूपाक्ष

*अनुपल्लवि*

श्रीधरादिहित श्रीविद्योपासककल्पवृक्ष
मोदकर योगपट्टाभिरामसरोरुहाक्ष
नादरूपवेदविदितमहिमान्वित
दक्षाध्वरविध्वंसनकरणदक्ष कृपाकटाक्ष

*चरणम्*

परमाद्वैततत्वबोधक ब्रह्माण्डनायक
पञ्चाक्षर मनुसम्मोदितजगदानन्दकारक
करतलादिभावितपरतत्वप्रदर्शभाव
पञ्चब्रह्ममयपञ्चाचार्यगुरुविभव
करविधृतवीणापुस्तकाक्षमाला-
सौराष्ट्राधार काञ्चीपुराधीश्वर महेश्वर

✠ ✠ ✠ ✠ ✠

# २२ श्रीनागलिङ्गमुपास्महे

रागं : वाचस्पति ताळं : मिश्र झम्पे

*पल्लवि*

श्रीनागलिङ्गमुपास्महे साम्बं
श्रीकामेश्वरीप्रियं चित्प्रतिबिम्बम्

*अनुपल्लवि*

श्रीनीलकंठं शिवं महानटं
ध्याननिरतनिजभक्तकूटं बालचन्द्र-
शोभितजटाजूटं गजचर्मपटम्

*चरणम्*

ओं आदिवर्णसम्बोधितविश्वनाथं
उमादेव्यास्थानकं उपनिषत्प्रतिपादितम्
शमदमादिसकलयोगसुप्रीतं सततं
समाधियोगनिरतं नीललोहितम्
अमादिपूर्णिमान्ततिथिशक्तिरूपं
श्रीविद्या सहितपशुपतीं वाचस्पतिम्

✠ ✠ ✠ ✠ ✠

# २३ श्रीलिङ्गराज नमोस्तु ते

रागं : (नव) अमृतवर्षिणि ताळं : आदि

*पल्लवि*

श्रीलिङ्गराज नमोस्तु ते
नीलकंठशोभित नागराजाद्यलंकृत

*अनुपल्लवि*

शैलजासहित श्रीविद्या विनुत
कालातीत कालभैरवादिशिवगणवन्दित सृष्ट्यादिनिरत

*चरणम्*

पुराणवेदागमप्रतिपादित
भूतादिसकललोकपालननिरत
पुरा वसिष्ठगौतमाद्युपासित
भूरिकृपान्वित पालितमुनिसुत
आराधकपुनर्जन्मनिवारक अमृतवर्षिणि रागरञ्जित

✠ ✠ ✠ ✠ ✠

# २४ सदाशिवमुपास्महे

रागं : सरसाङ्गि   ताळं : चतुरश्र त्रिपुट

*पल्लवि*

सदाशिवमुपास्महे सततं
सदाशिवासहितं अमरविनुतम्

*अनुपल्लवि*

सद्गुरुरूपधरं शङ्करं
सदाभीष्टदानपरं सरसाङ्ग्यर्धनारीश्वरम्

*चरणम्*

अपरोक्षसुज्ञानदायकं
अरिषड्वर्गमदध्वंसकम्
अगजात्मकं गुहजनकं
अमर्त्य[10]नगरसंरक्षकम्
जपतपादिनिष्ठान्तःकरणव्यक्तरूपजपाकुसुमभासुरं
जगत्प्रतिपादितनिजरूपं जगदानन्दकर[11]त्र्यम्बकम्

✠ ✠ ✠ ✠ ✠

[10]अमात्य
[11]जगदाह्लादकर

# २५ स्वामिनाथ पालय मां सदाशिव

रागं : चारुकेशि    ताळं : खण्ड त्रिपुट

*पल्लवि*

स्वामिनाथ पालय मां सदाशिव
स्वादिष्ठानादिसकलक्षेत्रोद्भव

*अनुपल्लवि*

स्वात्मानन्दरतपरमेश्वर स्वप्रकाश
स्वरव्यञ्जनस्वर्णगर्भ स्वयंभव

*चरणम्*

आधारमखिललोकानां आदिगुरुवरेण्य ॥१॥

आनन्दसुधारसवर्षक श्रीविद्या नागलिङ्गात्मक ॥ 2॥

आश्रिताभीष्टफलद अनन्तानन्तकोटिलावण्य देवाग्रगण्य ॥ 3॥

सज्जनहृदयसदानन्द सच्चिदानन्द शङ्कर जगदानन्द
सुनादपरितोषितबिम्ब अनादितेजोरूप साम्ब ॥ 4॥

✠ ✠ ✠ ✠ ✠

# २६ हाटकेश्वरं भजेऽहं

रागं : हाटकाम्बरि ताळं : त्रिश्र त्रिपुट

*पल्लवि*

हाटकेश्वरं भजेहं
हारालंकृत[12]स्फटिकसन्निभदेहम्

*अनुपल्लवि*

हाटकाम्बरधरं परात्परं
हालास्यनगराधीश्वरम्
हादिकादि श्रीविद्ये श्वरं जटाजूटधरं हरम्

*चरणम्*

पार्वतीसहितं शशिधरं
पाताळवासिनं सर्वेश्वरम्
पावनमधुरराजेश्वरं
पार्थ[13]वरप्रदं किरातेश्वरम्

*मध्यमकाल साहित्यम् (त्रिश्रनडे)*

परमाद्भुतलीलासुचरित्रं
परमाद्वैतपवित्रं वरगुहविश्वासपात्रम्

✠ ✠ ✠ ✠ ✠

[12]हारालङ्कृत
[13]प्रार्थित

# *विष्णु*

## २७ पद्मनाभं भजेऽहम्

रागं : यदुकुलकाम्भोजि  ताळं : आदि

### *पल्लवि*

पद्मनाभं भजेऽहं सततं
पद्मचरणशोभितं लक्ष्मीकान्तम्

### *अनुपल्लवि*

पद्मदळायताक्षीसेवितं
परमकृपान्वितं अनन्तम्

### *चरणम्*

शशाङ्कशेखरप्रियमित्रं
दशावतारविदितसुचरित्रम्
शशिरविकुलोद्धारकं श्रीकरं
दुष्टदानवहरं दामोदरम्
शेषशायिनं श्रीविद्या कृतार्चनं
यदुकुलकाम्भोदि शशिनं

✠ ✠ ✠ ✠ ✠

# २८ बालकृष्णं भावयेऽहम्

रागं : नीलवेणि     ताळं : आदि

*पल्लवि*

बालकृष्णं भावयेऽहं
बलरामानुजं देवकीतनूजम्

*अनुपल्लवि*

नीलवेणी गानलोलं नीलकुन्तळजालं
नीलरत्नवनमालं गोपालम्

*चरणम्*

लीलया कंसादिदैत्यहरं
श्रीविद्या मोदकरं श्रीकरम्
श्रीलोलमनघमाश्रितमन्दारं
काळीयविषधरभञ्जनचतुरं
बलिराज्यहरणार्थकृत-
वामनावतारं मुरळीधरम्

✠ ✠ ✠ ✠ ✠

# २९ भज गोविन्दम्

रागं : भूपाळपञ्चमम्  ताळं : आदि

*पल्लवि*

भज गोविन्दं भूमिपालकं
भजकमनोरथपूरकम्

*अनुपल्लवि*

भुजगशायिनं बृन्दावनवासिनं
भूपालपञ्चम प्रेरकम्[१४]

*चरणम्*

कुवलयपीडान्तकं शौरिं वसुदेववरसुतम् ॥ १ ॥

कुचेलभक्तसेवितं लोकवन्दितचरणयुगळम् ॥ २ ॥

कौन्तेयसारथिं गीताब्रह्मबोधकं
मुकुन्दं कमललोचनम् ॥ ३ ॥

कामादिभञ्जनं श्रीविद्या निलयं
राधारमणं कलिदोषहरम् ॥ 4 ॥

✠ ✠ ✠ ✠ ✠

[१४] प्रेषकम्

# ३० श्रीरङ्गनाथ पाहिमां

रागं : कल्याणवसन्तम्  ताळं : मिश्र झम्पे

*पल्लवि*

श्रीरङ्गनाथ पाहिमां कृपालय
श्रीनिवास श्वेताद्रिनिलयाऽप्रमेय

*अनुपल्लवि*

क्षीरसागरशयन भवभयहरण
क्षितिजारमण क्षितीशादिवन्दितचरण
गरुडगमन नारायण त्रितापहरण
श्रीविद्यो पासकानुग्रहचरण

*चरणम्*

गजारण्यवास श्रीवेङ्कटेश
गजेन्द्रमोक्षतीर्थव्त्री[१५]स्तुतिपात्र
विजयजयशापविमोचन सुचरित्र
अजभवेन्द्रादिविनुत अनन्तानन्तगुणभरित
कल्याणवसन्त रागतोषित

✠ ✠ ✠ ✠ ✠

[१५] वसिष्ठादि

# सरस्वति

## ३१ वन्देऽहं सदा शारदाम्

रागं : हंसनटनि ताळं : आदि

*पल्लवि*

वन्देऽहं सदा शारदां
हंसनटनी रागप्रियां विद्याम्

*अनुपल्लवि*

मन्दहासिनीं मनोन्मणीं
मञ्जुळवाग्विलासिनीं ब्रह्म-
मनोल्लासिनीं मानिनीम्

*चरणम्*

मूलाधारादिषट्चक्रान्तर्गतां
मूकवाक्प्रदानसुविख्याताम्
मूलप्रकृत्यादिस्वरूपां
मूर्तामूर्तभव्यस्वरूपाम्
कर्तृत्वाद्यतीतरूपां
कविजनसम्मोहितचिद्रूपाम्

✠ ✠ ✠ ✠ ✠

# ३२ सरस्वतीं भगवतीम्

रागं : हंसविनोदिनि  ताळं : मिश्र झम्पे

*पल्लवि*

सरस्वतीं भगवतीं नमाम्यहं
संमोदिनीं परम हंसविनोदिनीम्

*अनुपल्लवि*

सरसीरुहासनप्रिययुवतीं श्रीमतीं
सरळस्वभावसुमतीं सन्नुतकीर्तिम्
सरसगानलोलवागीश्वरीं
सांप्रदायिकगायकानुग्रहकरीं शुभकरीम्

*चरणम्*

मूकवाक्प्रदानविख्यातां सुचरितां
शुकशौनकादिवन्दितां करुणान्वितताम्
पाकशासनादिसुरपूजितां दरहसितां
शुकपुस्तकवीणामणिमालालङ्कृताम्
राकेन्दुवदनविराजितां
शुभ्रवस्त्रशोभितां श्रीविद्या तोषिताम्

✠ ✠ ✠ ✠ ✠

# लक्ष्मि

## ३३ कमलाम्बिके मामव

रागं : नाट ताळं : खण्ड झम्पे

*पल्लवि*

कमलाम्बिके मामव सदा
करुणालहरि माधवमनोहरि

*अनुपल्लवि*

कमलासनप्रिये विमले
समुद्रमथनकलोद्भवे
महालक्ष्मि मोहिनीरूपयुते

*चरणम्*

इन्द्रादिदेवपूजिते
गजगामिनि निजलिङ्गेश्वरपूजिते ॥ १॥

प्रपञ्चाह्लादकरामृतपात्र-
शोभितहस्ते नाट रागप्रिये ॥ २॥

नीलकण्ठविषपानस्तम्भित-
सकलजगन्मङ्गळे पद्मासने ॥ ३॥

श्रीविद्या चित्प्रभानन्दराजयोगीन्द्र-
वन्दितचरणयुगळे ॥ ४॥

✠ ✠ ✠ ✠ ✠

## ३४ कामाक्षीं वरलक्ष्मीम्

रागं : वसन्त ताळं : रूपकम्

*पल्लवि*

कामाक्षीं वरलक्ष्मीं
वन्दे कञ्जदळायताक्षीम्

*अनुपल्लवि*

काञ्चीपुरवासिनीं कामितार्थदायिनीं
कामजनकसहोदरीं कारुण्यलहरीम्
कलावतीं कराळीं काळिकारूपिणीं
कात्यायनीं काळरूपिणीम्

*चरणम्*

एकाम्रेश्वरप्रियविनोदिनीम्[१६] ॥ १॥
पाकारिमुखसुरजयार्थ बहुरूपधारिणीम् ॥ २॥
शिवयोगिज्ञानिहृदयनिवासिनीं
शिंशुमारोज्जीवनकारिणीं मनोन्मणीम् ॥ ३॥
शरदिन्दुनिभवदनां सुरुचिरमणिरदनां
वरदहराकाशमध्यवर्त्तिनीम्
निरवधिसुखदां वसन्त शरदृतुसंपूजिताम् ॥ 4॥

✠ ✠ ✠ ✠ ✠

[१६] मोदिनीम्

# ३५ परिपाहि मां श्रीवरलक्ष्मि

रागं : शुभपन्तुवराळि  ताळं : आदि

*पल्लवि*

परिपाहि मां श्रीवरलक्ष्मि

*अनुपल्लवि*

परमपवित्रे पङ्कजनेत्रे परमेश्वरविनुते
परात्परतत्वविधिते परमाद्भुतचरिते

*चरणम्*

विष्णुमनोनुकूले विमले
विश्वमङ्गळप्रदानकुतूहले
जिष्णुपदादिसन्मङ्गळप्रदे
जितमन्मथसौन्दर्ये श्रीविद्ये
निर्विकल्पसविकल्पसमादिस्थे
हिरण्यादि गर्भस्थे
निर्विकारयोगिहृदयस्थे
शुभपन्तुवराळि रागतोषिते

✠ ✠ ✠ ✠ ✠

# ३६ पाहि मां वरलक्ष्मि

रागं : गुण्डक्रिय ताळं : खण्ड त्रिपुट

*पल्लवि*

पाहि मां वरलक्ष्मि कामाक्षि

*अनुपल्लवि*

महिषासुरादिरिपुकुलविध्वंसिनि महामहिमशालिनि
महागणपतिगुहजननि महाबलाद्रिवासिनि

*चरणम्*

एहि वारिजमुखि त्रिभुवनेश्वरि
देहि मे मुदं श्रीविद्याधीश्वरि
ऐहिकामुष्मिकफलप्रदेश्वरि
देहि मे दृढभक्तिं जगदीश्वरि
परब्रह्मस्वरूपिणि वरगुण्डक्रिया-
रागरागिणि कल्याणि

✠ ✠ ✠ ✠ ✠

# ३७ क्षीरसागरशयन

रागं : मायामाळवगौळ ताळं : चतुरश्र झम्पे

*पल्लवि*

क्षीरसागरशयनवक्षस्तलनिवासिनीं
प्रणमामि स्मरजननीं मनोन्मणीं
पापविमोचनीं लोकजननीं निरञ्जनीम्

*अनुपल्लवि*

क्षित्यादिशिवान्तषट्त्रिंशत्तत्त्वस्वरूपिणीं
शिवमोदिनीं मायामाळवगौळस्वरूपिणीम्
क्षिप्रप्रसाददायिनीं विप्रविश्वासिनीं
स्वप्रकाशतेजप्रकाशिनीं
चित्प्रकाशदायिनीं मानिनीम्

*चरणम्*

कङ्कणमणिमयाभरणयुतमातङ्गीं मेचकाङ्गीं
अङ्कुशचापबाणेक्षुहस्तां मोदिनीं शैलनन्दिनीम्
कुम्भसम्भवलोपामुद्रार्चनतोषिणीं
काञ्चीपुरवासिनीं कञ्जदळायताक्षीं कामाक्षीम्
अन्तरङ्गपूजातोषिणीं कंब्रह्माख्याकशतत्वशालिनीम्
अम्बां श्रीविद्यारसास्वादिनीम्

✠ ✠ ✠ ✠ ✠

# *देवि (पार्वति)*

## ३८ अम्ब विन्ध्याचलवासिनि

रागं : रामप्रिय  ताळं : मिश्र झम्पे

*पल्लवि*

अम्ब विन्ध्याचलनिवासिनि मां पाहि
अम्बुजाक्षि श्रीविद्या तत्त्वप्रकाशिनि

*अनुपल्लवि*

साम्बशिवसहिते मूलप्रकृत्याकृते
कुम्भसम्भवदूर्वासमहामुनिवन्दिते
कुंकुमगन्धानुलिप्ते ललिते

*चरणम्*

हिरण्मयि हरवामाङ्कवासिनि
विद्युल्लेखासमप्रभाशालिनि
हीरमणिमयाभरणविभूषिणि
वैद्येश्वरि भवरोगनिवारिणि
हरिहरविरिञ्चादिविनुते
वीरलक्ष्मणाग्रज रामप्रिय शिवदयिते महिते

✠ ✠ ✠ ✠ ✠

# ३९ अम्बा श्रीराजराजेश्वरि

रागं : भोगवसन्तम् ताळं : आदि

*पल्लवि*

अम्बा श्रीराजराजेश्वरि
अम्बुजाक्षि श्रीकामाक्षि

*अनुपल्लवि*

लम्बोदरजननि कामेश्वरि
संमोहिनि सुरेश्वरि
शातोदरि शाकम्बरि श्रीपतिसोदरि
श्रितजनशुभकरि शिवशङ्करि

*चरणम्*

एकानेकाक्षरमनुरूपिणि
एकाग्रचित्तार्चिततोषिणि
शोकशमनकारिणि कल्याणि
शाम्भवि रमाधिशक्तिवासिनि
विकाररहित[१७]विमलेश्वरि
विनुत श्रीविद्या षोडशाक्षरि
अकारादिक्षकरान्तवागीश्वरि
भोगवसन्त भोगेश्वरि

✠ ✠ ✠ ✠ ✠

[१७] विकारणान्त

## ४०  अम्बुजाक्षि पाहि माम्

रागं : सिंहवाहिनि    ताळं : आदि

*पल्लवि*

अम्बुजाक्षि पाहि मां कामाक्षि
अम्बा लोकजननि जगन्मोहिनि

*अनुपल्लवि*

कम्बुकण्ठि कामेश्वरि कृपाकरि
कुम्भसम्भवाद्युपासित श्रीविद्ये सुरासुरादिवन्द्ये

*चरणम्*

महिषासुरादिरिपुभञ्जनि
महिमान्वितमनोन्मणि शूलिनि
महादेवमानसोल्लासिनि
महाशक्तित्रयस्वरूपिणि
श्रीं ह्रींकारेकाक्षरानुवागर्थस्वरूपिणि सिंहवाहिनि

✠ ✠ ✠ ✠ ✠

# ४१ उमां नमामि

रागं : हेमवति ताळं : मिश्र झम्पे

*पल्लवि*

उमां नमामि हैमवतीं भगवतीं
उपनिषत्प्रतिपादितमहाशक्तीम्

*अनुपल्लवि*

रमावाण्यादिरूपिणीं नारायणीं
हिमांशुमौळिहृत्तोषिणीं घणिवेणीम्
शिष्यप्रशिष्यप्रकाशितनिजतत्त्वां
शिल्पशास्त्रविशारदं शिवदयिताम्

*चरणम्*

परमपवित्रां अतिशयसुचरित्रां
परात्परां पङ्कजमित्रां बहुकळत्राम्
शिरसालंकृतचन्द्रकलाधरलीलां
धरणीसुरगेयां हिमगिरिवरबालाम्
परब्रह्मप्रकाशच्छायां परमाद्वैततत्त्वप्रियां
प्रकटित श्रीविद्याम्

✠ ✠ ✠ ✠ ✠

# ४२ ओ जगदम्ब

रागं : नारायणदेशाक्षि   ताळं : खण्ड त्रिपुट

*पल्लवि*

ओ जगदम्ब शरणागतवत्सले
राजराजेश्वरि परशिवे चित्कले

*अनुपल्लवि*

ओम्काररूपिणि कमले कोमले
ओघत्रयनिवारिणि श्रीविद्ये बाले
अजरामरवन्दितचरणयुगळे
अगजे ब्रह्माण्डस्रष्ट्यादिमूले

*चरणम्*

अकारादिक्षकारान्तस्वरूपिणि
अखण्डैकाद्वैततत्वप्रकाशिनि
आकाररहिते निरुपमतेजस्विनि
आकाशभूम्यन्तविकासिनि
ह्रींकाररूपिणि नारायणदेशाक्षी रागतोषिणि
नारायणि

✠ ✠ ✠ ✠ ✠

# ४३ कामाक्षि पाहि मां मीनाक्षि

रागं : शिवकाम्बोजि  ताळं : खण्ड त्रिपुट

*पल्लवि*

कामाक्षि पाहि मां मीनाक्षि
कञ्जदळायताक्षि करुणाकटाक्षि

*अनुपल्लवि*

कामारिमनोहरि कौमारि गौरि
कमलपदशोभिते श्रीत्रिपुरसुन्दरि
कामेप्सितकरि कामकोटिनिलये
श्रीविद्येश्वरि कामजनकसहोदरि

*चरणम्*

शिवकाम्बोजि रागसन्तोषिते
शिष्टाचारपरिपालननिरते
शिवशङ्करि नतशङ्करीति विख्याते
शिष्यसमेतमहामुनिवन्दिते
सर्वभवरोगहरतारकस्वरूपयुते
सर्वलोकपरिपालननिरते

✠ ✠ ✠ ✠ ✠

# ४४ कामाक्षि पाहि मां हरार्धाङ्गदेशाक्षि

रागं : जनरञ्जनि ताळं : रूपकम्

*पल्लवि*

कामाक्षि पाहि मां
हरार्धाङ्गदेशाक्षि

*अनुपल्लवि*

कामारिसदाशिवसाक्षि करुणाकटाक्षि
कामकोटिपीठस्थिते कञ्जदळायताक्षि

*चरणम्*

सहस्रविद्युल्लेखासमदेहकान्तिशालिनि
सहस्राक्षादिसकलसुरपालिनि जनरञ्जनि
हकारमकारसकाररूपश्वासोच्छ्वासमयि
हंसमन्त्ररूपिणी श्रीविद्या स्वरूपिणि

✠ ✠ ✠ ✠ ✠

# ४५ कामेश्वरीम्

रागं : कामवर्धनि   ताळं : मिश्र झम्पे

*पल्लवि*

कामेश्वरीं कामवर्धिनीं (भजमानस)
कामकोटिपीठनिवासिनीं कामाक्षीम्

*अनुपल्लवि*

कामेश्वरमनोहरीं कारुण्यलहरीं
करुणाकटाक्षीं कञ्जदळायताक्षीम्
कालातीतां एकाम्रेश्वरकामपरिपूर्णकरीं
त्रिपुरसुन्दरीम्

*चरणम्*

सर्वानन्दमयत्रिकोणान्तर्गतचक्रवासिनीं
पञ्चब्रह्मपर्यन्तोपदेशिनीम्
शर्वमहाकालभैरवादिदेवतासहितां
चतुःषष्ठिकलान्तरङ्गयोगिनीम्
सौम्यां सौम्यतरकान्तियुतां
सोमसूर्याग्निलोचनां शुभान्विताम्
सोमनाथमनोल्लासिनीं सौभाग्यदायिनीं
शारदादित्रिशक्तिरूपिणिम्

✠ ✠ ✠ ✠ ✠

# ४६ गौरि मनोहरि

रागं : गौरिमनोहरि ताळं : मिश्र झम्पे

*पल्लवि*

गौरि मनोहरि पाहि कौमारि
गौरवर्णदेवते गौतमादिवन्दितशताक्षरि

*अनुपल्लवि*

गीर्वाणवाक्प्रदानकरि शङ्करि
गिरिराजकुमारि परादि[१८]वाग्वैखरि
गुप्तयोगमाये गुरुमओदये
गुणालये गङ्गाधरजाये सहृदये[१९]

*चरणम्*

परमपवित्रत्रिपुरसुन्दरि मन्त्रेश्वरि
परमेश्वरमनोहरि परमदयाकरि
वरमुनिवसिष्ठोपासितपदाम्भूउहे
वरेण्यवासवादित्यसमुदाये माये
प्रळयाग्निज्वालमाल्याधरे
परमाद्वैतभावपरे पालिताखिलसुरे

✠ ✠ ✠ ✠ ✠

[१८]परात्पर
[१९]गुहदाये

# ४७ चामुण्डेश्वरि पालय माम्

रागं : ऋषभप्रिय ताळं : खण्ड त्रिपुट

*पल्लवि*

चामुण्डेश्वरि पालय मां
श्रीराजराजेश्वरि भुवनेश्वरि[२०]

*अनुपल्लवि*

श्रीविद्ये अपरोक्षज्ञानिमनोनुकूले
श्रीकण्ठदयिते ज्ञानक्रियेऽच्छाशक्तिसहिते
अनन्तगुणशीले

*चरणम्*

दुर्वासमहामुनिहृत्तोषकरि
दुर्गाशब्दबोधितविजयेश्वरि
पूर्वादिसप्तसमुद्रपवित्रकरि
पूर्णचन्द्रकलाधरि कृशोदरि
पर्वतराजकुमारि पापविमोचनकरि लोपामुद्रा शङ्करि
पर्वकालार्चितश्रीमहात्रिपुरसुन्दरि
ऋषभप्रिय रागमोदकरि

✠ ✠ ✠ ✠ ✠

[२०]परमेश्वरि

## ४८ चिन्तयामि जगदम्बाम्

रागं : हिन्दोळम्  ताळं : मिश्र झम्पे

*पल्लवि*

चिन्तयामि जगदम्बां चामुण्डाम्बां
चित्तरञ्जनदिव्यकान्तीं चित्प्रभाम्

*अनुपल्लवि*

चिरामृतवर्षनयनां हर्षवर्षदाम्
चन्द्रप्रभासममन्दहासवदनाम्

*चरणम्*

तत्वप्रकाशकतारकरूपां बृहदात्मिकां
ज्ञानातीतज्योतिस्वरूपाम्
तुम्बुरुनारदादिसेवितचरणारविन्दाम्
तानलयमूर्च्छनयुत हिन्दोळ प्रीताम्
दनुजमदभञ्जनीं धनधान्यसौभाग्यदायिनीं धर्मसंस्थापिनीं
दुर्गां आद्यन्ता श्रीविद्यां धरणिपालनिरताम्
मतिं नः प्रचोदयित्रीं ललिताम्

✠ ✠ ✠ ✠ ✠

# ४९ चिन्तयामि सततम्

रागं : धेनुक ताळं : त्रिश्र झम्पे

*पल्लवि*

चिन्तयामि सततं मूलप्रकृतिस्वरूपाम्

*अनुपल्लवि*

चित्तत्त्वचिन्तामणीं चिदग्निकुण्डसंभूतं
चिन्तितार्थफलप्रदां चित्तजारिसन्तोषिताम्
चित्प्रकाशानन्दकर श्रीविद्या स्वरूपां
चिच्छक्त्याविर्भूतां इच्छाक्रियाज्ञानात्मिकाम्

*चरणम्*

महामायां आर्यां मधुमदमोदितहृदयां
सहस्रसूर्यसमप्रभां सहस्राक्षादिविनुताम्
गुहगणादिसंसेवितां गमनागमनवर्जिताम्
महामहिमोपेतां महादैत्यहाहाकारसमये क्रूर-
महिषशिरच्छेदनकरचरित्रां काम धेनुका तिशयाम्

✠ ✠ ✠ ✠ ✠

# ५०   जगन्मोहिनीं हरमोहिनीम्

रागं : जगन्मोहिनि    ताळं : मिश्र झम्पे

*पल्लवि*

जगन्मोहिनीं हरमोहिनीं वन्दे
राजराजेश्वरीं राजयोगिनीम्

*अनुपल्लवि*

योगपट्टाभिरामां महामायां
चतुःषष्ठिकोटियोगिनीगणवन्दितां
चिदग्निकुण्डसम्भूतां शुभचरिताम्

*चरणम्*

जगज्जननीं श्रीकामारीं मनोन्मणीं
चिन्तामणिनिलयां सौभाग्यसागराम्
नगनन्दिनीं महाकाळीं चिन्मयीं
मन्दस्मितगमनां सुरमनोल्लासिनीम्
नागलिङ्गप्रियां महामातङ्गीं
सिंहासनाधीश्वरार्चिताम्
श्रीविद्या चित्प्रभानन्दराजयोगीन्द्रवन्दितां
कृपाकटाक्षसहिताम्

✠ ✠ ✠ ✠ ✠

# ५१ देवि श्रीमीनाक्षि

रागं : चक्रवाकम्      ताळं : खण्ड त्रिपुट

*पल्लवि*

देवि श्रीमीनाक्षि मां पाहि
देवादिविनुते तव पादभक्तिं देहि

*अनुपल्लवि*

शिवे श्रीविद्ये सुन्दरकाये
भाविभूतप्रपञ्च स्रष्टिकार्यस्वदेहनिलये महामाये

*चरणम्*

त्रिकोणमध्यगतपञ्चब्रह्मास्थिते
सूर्यातीतपरमपदशोभिते वैभवे
शक्रशचीसंपूजिते शैलसुते
चक्रवाकध्वनिघोषिते दयानिधे
शुक्रादिग्रहनक्षत्रमालाशोभिते जाग्रदाद्यवस्थातीते

✠ ✠ ✠ ✠ ✠

# ५२ दुर्गादेवि संरक्ष माम्

रागं : धर्मवति ताळं : आदि

*पल्लवि*

दुर्गादेवि संरक्षव्मां
स्वर्गादिसकलसौख्यदायिनि

*अनुपल्लवि*

दुर्गासुरादिदैत्यभञ्जनि दुर्गतिदुराचारविध्वंसिनि
भर्गहृदयमोदिनि गर्गमुनिवरदायिनि त्रैलोक्यमोहिनि

*चरणम्*

नारदमुनि हृत्सरसिजनिलये
पादादिशिखान्तब्रह्माण्डवलये
वरकण्ठीरवशरभेश्वरप्रिये
पावन श्रीविद्या निलये सदये
वरपाशेक्षुधनुर्बाणयुते
वर धर्मवती नामप्रतिपादिते

✠ ✠ ✠ ✠ ✠

# ५३ नादरूपिणीम्

रागं : कोकिलपञ्चमम्  ताळं : आदि

*पल्लवि*

नादरूपिणीं वन्देऽहं
नवाक्षरीं श्रीविद्या त्मिकाम्

*अनुपल्लवि*

नारायणीं कोकिलपञ्चम रागिणीं
नवग्रहबलनायिकां नवदुर्गाम्

*चरणम्*

कादिहान्तमतान्तस्थितां
अविद्यामूलहारिणीम्
कात्यायनीं करुणारसपरिपूर्णां
आगमशास्त्रसंस्तुतां गुरुसंप्रदायतोषितबिम्बाम्
गणेशस्कन्दजननीं परदेवताम्

✠ ✠ ✠ ✠ ✠

# ५४ परिपाहि माम्

रागं : षण्मुखप्रिय  ताळं : मिश्र झम्पे

*पल्लवि*

परिपाहि मां महादेवि मीनाक्षि
पारिजाततरुरिव ममेष्टार्थं देहि

*अनुपल्लवि*

परिमळपुष्पमालिनि पतितपावनि
करिवदन षण्मुखप्रिय जननि मानिनि
कारुण्यसुधावाहिनि कदम्बवनवासिनि
कात्यायनि कल्याणगुणशालिनि

*चरणम्*

अनादिपरशिवदयीते भक्तजनहिते
अकारानाकाररूपयुते ललिते
अनाथपरिपालननिरते नमस्ते
अकाराद्यक्षरसमूहस्थिते गिरिसुते
सुनादविनोदप्रिये महामाये अप्रमेये
सनकादिमुनिगेये  श्रीविद्ये

✠ ✠ ✠ ✠ ✠

# ५५ परिपाहि मां सदा परदेवते

रागं : शुद्धधन्यासि ताळं : मिश्र झम्पे

*पल्लवि*

परिपाहि मां सदा परदेवते
परम श्रीविद्ये नमोस्तु ते परमानन्दभरिते

*अनुपल्लवि*

परशिवसहिते वारिजनिभपदशोभिते
परतत्त्वप्रतिपादिते शुद्धधन्यासि रागतोषिते

*चरणम्*

अकारादिक्षकारान्तवर्णस्वरूपिणि
अकामकर्मसन्तोषिणि अहिनिभवेणि
एकन्तमनोलयकरि श्रीपतिसोदरि
एकाम्रनाथेश्वरप्रियकरि जगदीश्वरि
अगणितमहिमप्रकाशिते अघजालहरण-
विख्याते अगस्त्यादिसकलमुनिनुते

✠ ✠ ✠ ✠ ✠

# ५६ पाहि मां सततम्

रागं : हिन्दोळदेशिक ताळं : आदि

*पल्लवि*

पाहि मां सततं जगज्जननि

*अनुपल्लवि*

एहि मुदं देहि परात्परे
ऐहिकामुष्मिकफलप्रदानकरि
श्रीकरि श्रिविद्येश्वरि

*चरणम्*

सप्तस्वरोत्पन्नसुनादसमुद्घोषान्तरङ्गिणि
आप्तभक्तशिरोमणि श्रीमदगस्त्यमुनिपूजितमहायोगिनि
सत्पुत्रपौत्रकळत्रदायिनि हिन्दोळदेशिक सम्मोदिनि

✠ ✠ ✠ ✠ ✠

# ५७ पाहि मां श्रीपरमेश्वरि

रागं : हिन्दोळ दर्बार्   ताळं : खण्ड रूपकम्

*पल्लवि*

पाहि मां श्रीपरमेश्वरि
पाशमोचनकरि श्रीकरि

*अनुपल्लवि*

पाण्ड्यकुलोद्धारकरि शङ्करि
फालाक्षसुखकरि षरतत्त्वाधीश्वरि एकाक्षरि

*चरणम्*

कुंकुमवर्णसुमशोभिते कुम्भसम्भवमुनिपूजिते
कुंकुमकस्तूरितिलकयुते कुञ्जरमुखषण्मुखविनुते
गंगादिसकलतीर्थसेविते श्रीविद्या धिदेवते
गन्धादिसुगन्धलेपिते गौरवर्णदेहकान्तिसहिते

✠ ✠ ✠ ✠ ✠

# ५८ पाहि मां श्रीराजराजेश्वरि

रागं : जयसंवर्धनि ताळं : खण्ड त्रिपुट

*पल्लवि*

पाहि मां श्रीराजराजेश्वरि
पर्वतराजकुमारि एकानेकक्षरि भुवनेश्वरि

*अनुपल्लवि*

एहि देवि त्वत्पादपद्मसेवनं
देहि सदा मम जननी एकाम्रनाथेश्वरि

*चरणम्*

श्रीविद्या मोदिनि मनोन्मणि
श्रीकण्ठेश्वर जयसंवर्धनि
अविद्यामूलहरणनिपुणचरणे
अविनाशकैवल्यप्रदान्तःकरणे
अनादिपरशिवजाये अनन्तगुणनिकाये
अनल्पकरुणानिलये

✠ ✠ ✠ ✠ ✠

# ५९  बाले बृहत्सृष्टिमूले

रागं : सिम्हेन्द्रमध्यमम्  ताळं : आदि

*पल्लवि*

बाले बृहत्सृष्टिमूले विमले
कापालेश्वरमहादेवलीले

*अनुपल्लवि*

ज्वाले विचित्रमायाजाले
कृपालवाले मोक्षकरि कुण्डलि माले कोमले

*चरणम्*

नमोंता दिव्यनामपूजिते नवावरणान्तर्गतवासरते
भूमिपालनरते ब्रह्मजाते भूधराधिपतिसुते शिवसहिते
कमनीय सिंहेद्रमध्यमे नरकण्ठीरवमनोरमे
नमकचमकस्तोत्रसुप्रीते श्रीविद्ये सदा नमस्ते

✠ ✠ ✠ ✠ ✠

# ६० बृहन्नायकि

रागं : नायकि   ताळं : आदि

*पल्लवि*

बृह न्नायकि जगद्रक्षकि
बृहदानन्दकरि त्रिपुरसुन्दरि

*अनुपल्लवि*

ब्रह्मजाते बृहस्पतिवन्दिते
भृगुमुनिसन्नुते भव्यचरिते
बृहदीश्वरवामाङ्कस्थिते
श्रीविद्या षोडशाक्षरहिते

*चरणम्*

उमारमावाण्यादिसेव्ये
अमादिपूर्णिमान्ततिथ्याराध्ये
समाधियोगमात्रध्येये
शमय मे मोहान्धकारम्
माये विमले अक्षराक्षरमूले
मनूनां कलये नमः कलये

✠ ✠ ✠ ✠ ✠

# ६१ ब्रह्माण्डवलये माये

रागं : माण्ड् ताळं : आदि

*पल्लवि*

ब्रह्माण्डवलये माये
ब्रह्मादिवन्दित शिवजाये

*अनुपल्लवि*

ब्रह्मविद्यानन्दित हृदये
ब्रह्मर्ष्याद्युपासित श्रीविद्ये ब्रह्मरन्ध्रनिलये

*चरणम्*

गौतमार्चितगायत्रि गौरि गिरिराजेन्द्रपुत्रि
कान्तरागिणि नारयणि कारुण्यललिते मञ्जुळवाणि
अन्तर्मुखज्योतिर्मयकल्याणि अहिनिभवेणि पुराणि
अतिरहितकैवल्यविहारिणि गतिनिर्जितकरिणि गीर्वाणि

✠ ✠ ✠ ✠ ✠

# ६२ भजरे रे मानस

रागं : पूर्णचन्द्रिक ताळं : आदि

*पल्लवि*

भज रे रे मानस महिषासुरमर्दिनीं
निजभक्तजयशुभदायिनीम्

*अनुपल्लवि*

भवसागरतारकरूपां
श्रीविद्यां महाकामसुन्दरीम्

*चरणम्*

पुरा देवासुरसंग्रामे दैत्यमस्तकच्छेदविनोदिनीं
हरादिदेवशक्तिस्वरूपिणीं मुरारिमोहिनीं महाबलाद्रिवासिनीम्
निरन्तरं भक्तविस्वासिनीं नवदुर्गां कामाक्षीम्
नित्य पूर्णचन्द्रिका विलासिनीं महाबलाद्रिनिवासिनीम्

✠ ✠ ✠ ✠ ✠

# ६३ भुवनेश्वरि

रागं : भुवनगान्धारि ताळं : देशादि

*पल्लवि*

भुवनेश्वरि भुवनमनोहरि
भुवनगान्धारि त्रिपुरसुन्दरि

*अनुपल्लवि*

भूतादिलोकव्यापिनि
भुवनमोदिनि विश्वविनोदिनि
शिवशक्ते शिवकान्ते शिवकाये
शिवजाये शिवार्धमूर्ते

*चरणम्*

महादेवादिसंसेविते महागणपतिगुहेशसहिते
अनाहतादिषट्कमलान्तस्थिते अखण्डैकरसास्वादभरिते
अकचटतपादि[२१]वर्णवैखरीप्रकाशिनि शिवे श्रीबाले
अणिमाद्यष्टसिद्धिशक्त्यात्मकनवावरण-
श्रीमदादि विद्ये

*शोल्कट्टु*

मखध्वंसकरि गसरिमा तझंतकिट
मुरहर पममग तकिट
मनोरञ्जक रिमगस तधिमित
ललिताम्बिके सनिदप तधिगिणतोम्

✠ ✠ ✠ ✠ ✠

[२१]अकचटतप्य:सादि

# ६४ भूरिभाग्यलहरि

रागं : प्रतापवराळि ताळं : आदि

*पल्लवि*

भूरिभाग्यलहरि भुवनेश्वरि
परिपाहि मां नित्यानन्दकरि

*अनुपल्लवि*

शौरिविरञ्चप्रमुखमोदकरि
गौरि गिरिराजकुमारि शङ्करि
पारिजातचिन्तामणिसदृशश्रीकरि
श्रीविद्या वशंकरि

*चरणम्*

यतीन्द्रादिसन्नुतशुभचरिते
यमेशानकुबेरादिविनुते
अतिशयवरदे आगमविदिते
अमेयमहिमान्विते ललिते
प्रतापवराळि महाकाळि
यदिच्छामि तद्देहि भृतभक्ताळि

✠ ✠ ✠ ✠ ✠

# ६५ मनोन्मणी माम वतु

रागं : उदयरविचन्द्रिक ताळं : चतुरश्र ध्रुवम्

*पल्लवि*

मनोन्मणी मामवतु मानसोल्लासिनी

*अनुपल्लवि*

महादेवमोहिनी मधुररानगरनिवसिनी
महिषभण्डत्रिपुरासुरप्रमुखमदभञ्जनी
महाराज्ञि महादेवी महामानिनी माधवी मातङ्गी

*चरणम्*

श्रीपुरवासिनी श्रीविद्या कैवल्यदायिनी
श्रीगिरीशकामिनी श्रीशशिशेखरमोदिनी
श्रीदुर्गाम्बिकाद्यमर्त्यादिवन्दितश्रीललिता
श्रीक रोदयरविचन्द्रिकाप्रका शिता
हरिविरिञ्चादिसंसेवितहिरण्मयकमलपदा परदेवता

✠ ✠ ✠ ✠ ✠

# ६६ महात्रिपुरसुन्दरि

रागं : कल्याणि   ताळं : त्रिश्र झम्पे (२ कळै)

*पल्लवि*

महात्रिपुरसुन्दरि शङ्करि मां पाहि

*अनुपल्लवि*

महादेवमार्ताण्डभैरवमनोहरि
महालिङ्गसन्तोषिणि श्रीवागीश्वरि
महानन्दभरिते मणिमयवीणापुस्तकयुते
मूककविवाक्प्रदानविख्याते महिते

*चरणम्*

सरोजदळनेत्रे अतिपवित्रे सुचरित्रे
समस्तब्रह्माण्डनिलये हिमाद्रितनये
सरससङ्गीततोषिते नामवेदनुते
समरासक्तमहामाये महोदये
कर्णरञ्जनमधुरभाषिणि श्रीविद्या रूपिणि
कर्णानन्दकरनादरूपिणि कल्याणि

✠ ✠ ✠ ✠ ✠

# ६७ महिषासुरमर्दिनि

रागं : नामनारायणि ताळं : खण्ड त्रिपुट

*पल्लवि*

महिषासुरमर्दिनि मनोन्मणि
महालक्ष्मि महाकाळि महावाणि

*अनुपल्लवि*

देहि मुदं दयावाहिनि दाक्षायणि
एहि कामवैरिमनाह्लादकारिणि
साहित्यमूलाक्षरस्वरूपिणि
सूक्ष्मनाळन्तर्गतत्रिवेणि

*चरणम्*

अणिमाद्यष्टसिद्धिदायिनि निरञ्जनि
गुणिजनहितकारिणि त्र्यम्बककुटुम्बिनि
गणेशगुहजननि ओंकारघोषिणि
वीणागानतोषिणि श्रीविद्या विहारिणि
माणिक्यमकुटभूषणि मृदुभाषिणि
मानिनि नामनारायणि

✠ ✠ ✠ ✠ ✠

## ६८ मातङ्गकन्याम्

रागं : शुद्धतोडि ताळं : खण्ड त्रिपुट

*पल्लवि*

मातङ्गकन्यां मनसा स्मरामि
मरकतमणिमयाङ्गीं मेचकाङ्गीम्

*अनुपल्लवि*

मार्ताण्डसन्निभप्रभासहितां
माणिक्यवीणाशोभितां ललिताम्
मातृकास्वरूपां आर्यां
मदनवैरिमानसनिलयां श्रीविद्याम्

*चरणम्*

भद्रां चिदग्निकुण्डसंभूतां
भण्डासुरादिदैत्यमथननिरताम्
भद्रादिनवदेवीसंपूजिताम्
भवभयहरणशक्तियुतां परशिवकान्तां
मुद्रातोषितां मदालसां
शुद्धतोडि रागमोदितां शान्ताम्

✠ ✠ ✠ ✠ ✠

## ६९ मानयत मञ्जुळवाग्विलासाम्

रागं : कोकिलप्रिय ताळं : त्रिश्र झम्पे

*पल्लवि*

मानयत मञ्जुळवाग्विलासां मायाम्

*अनुपल्लवि*

मीनायताक्षीं मातङ्गीं मनोन्मणीं
मङ्गळकर श्रीविद्या मोदिनीं
अन्तःकरणरूपिणीं अन्तरङ्गिणीम्

*चरणम्*

कोमलतरवक्त्रविजृम्भिणीं हिरण्मयीं
कोकिलप्रिय मधुरमितभाषिणीं चिन्मयीम्
निर्मलभक्तमनोल्लासिनीं महालक्ष्मीं
नीरजासनादिविनुतहरिसोदरीं कामाक्षीम्
कर्मज्ञानबोधिनीं नीलकण्ठकुटुम्बिनीं
धर्मादिसकलपुरुषार्थदायिनीं हरिणीम्

✠ ✠ ✠ ✠ ✠

# ७० राजराजेश्वरीं आश्रयेऽहम्

रागं : हिन्दोळवसन्तम्  ताळं : मिश्र झम्पे

*पल्लवि*

राजराजेश्वरीं आश्रयेहं
सुजनमनोरथपूरणकरीं श्रीविद्याधीश्वरीम्

*अनुपल्लवि*

गजमुखषण्मुखपरितोषणकरीं श्रीकरीं
एजदनेकजगदीश्वरीं कामवैरिमोदनकरीम्
शिवां अर्धनारीश्वरीम्

*चरणम्*

सुरासुरादिभावनातीतां महितां
सुरेशपालनरतां निगमान्तर्गताम्
नीरजासनादिविनुतां करुणान्वितां
निर्विकल्पसविकल्पसमाधिस्थां
वर इन्दोळवसन्त रागान्विताम्

✠ ✠ ✠ ✠ ✠

# ७१ राजराजेश्वरीं भावयेऽहम्

रागं : बालचन्द्रिक ताळं : खण्ड त्रिपुट

*पल्लवि*

राजराजेश्वरीं भावयेऽहं
राजशेखरमनोहारिणीं राजमातङ्गीम्

*अनुपल्लवि*

राजीवलोचनसुन्दरीं
रामादिवीरोपासितसुगुणलहरीम्
राकेन्दुवदनां रमणीयरदनां
राजसौमित्रीं राष्ट्रपालिनीम्

*चरणम्*

कुम्भसम्भवनुतकाञ्चीपुरवासिनीं
अम्बुजपाशयुतपाणीं कामेश्वरीम्
कञ्चवाळादिपुष्पपूजितां
पञ्चप्राणस्वरूपनागलिङ्गप्रियकुण्डलिनीम्
लम्बोदरजननीं निरञ्जनीं ललितां
गौरीं महात्रिपुरसुन्दरीम्
पङ्कजमुखीं पावनीं
पवित्र बालचन्द्रिका मोदिनीं मनोन्मणीम्

✠ ✠ ✠ ✠ ✠

# ७२ वन्दे जगदम्बिके

रागं : वसन्तभैरवि ताळं : खण्ड झम्पे

*पल्लवि*

वन्दे जगदम्बिके शिवे

*अनुपल्लवि*

विमलात्मिके हंसगमने ललने
पर्वतात्मजे संपत्प्रदे संसर्गे द्वं दुर्गे

*चरणम्*

अयनसंवत्सरमासपूजिते
अमरेशनुतिहिते परदेवते
अन्यादृशकरुणानिधीति सुख्याते
अरुणाचलेश्वरदयिते महिते
अजातगुरुवरसंपूजिते
आयुरारोग्यैश्वर्यप्रदे
आदि श्री महा विद्ये

✠ ✠ ✠ ✠ ✠

# ७३ वन्देऽहं शिवे

रागं : कदनकुतूहलम्   ताळं : चतुरश्र मठ्यम्

*पल्लवि*

वन्देऽहं शिवे बृहदानन्दे
वन्दितसुरबृन्दे लालितस्कन्दे

*अनुपल्लवि*

श्रीधरसहजाते करुणारसभरिते
वेदनुतसुचरिते सदाशिवसहिते
सदा भक्तजनपोषणासक्ते
पुराण कथनकुतूहल युते गिरिराजसुते

*चरणम्*

शाश्वतकैवल्यप्रदानविख्याते
श्रीविद्या तोषिते परमाद्वैतयुते
अश्वगजपदादिसंयुतसैन्यसहिते
अत्रिवसिष्ठादिमहामुनिपूजिते
अश्वत्थपिप्पलबिल्वतुलसीवनवासस्थे
अनादिविश्वचक्रमध्यस्थे

✠ ✠ ✠ ✠ ✠

# ७४ विजयतां श्रीराजराजेश्वरि

रागं :विश्वम्भरि ताळं : मिश्र त्रिपुट

*पल्लवि*

विजयतां श्रीराजराजेश्वरि विश्वम्भरि
विमलेश्वरि श्रीकाञ्चीनगराधीश्वरि

*अनुपल्लवि*

विजयतां श्रीविद्ये श्वरि विद्युल्लेखेव भास्वरि
विषपानासक्तश्रीमहादेवमनोहरि
पशुमानुषादिहृन्मोहनकरि शङ्करि

*चरणम्*

कनकखचितमणिवलयशोभिता शिवसहिता
कमलावासपद्मश्रीकरकोमलपदा
कनकाम्बरकरवीरसुममालालङ्कृता
कमनीयवाग्विलासा श्रीचक्रविद्यावेद्या
सरससङ्गीतशास्त्रविशारदा

✠ ✠ ✠ ✠ ✠

# ७५ विन्ध्याचलनिवासिनि

रागं : हरिकाम्भोजि ताळं : त्रिश्र त्रिपुट (२ कळै)

*पल्लवि*

विन्ध्याचलनिवासिनि पाहि माम्
वीणापुस्तकधारिणि जगन्मोहिनि

*अनुपल्लवि*

विद्युद्धामसमप्रभाशालिनि
विद्वन्मणिपोषिणि श्रीविद्या विहारिणि
वेदोक्तसकलमन्त्राभिमानिनि
नादब्रह्मोपासितपरिपालिनि

*चरणम्*

प्रळयकालाग्निस्वरूपिणि वाणि
परमेश्वरसन्तोषिणि फणिवेणि
कलिमलापहारिणि कामितदायिनि
कल्याणगुणशालिनि कात्यायनि
हीरमणिमयाभरणे भक्तान्तःकरणे
हरिकाम्बोधि रागाभरणे

✠ ✠ ✠ ✠ ✠

# ७६ विमलाम्बिके

रागं : विजयवसन्त ताळं : चतुरश्र त्रिपुट

*पल्लवि*

विमलाम्बिके परिपाहि माम्

*अनुपल्लवि*

विमलाङ्गश्रीशिवसुखकरि
विभुदार्चिते श्रीविद्येश्वरि

*चरणम्*

सनकादियोगिसंसेविते
सन्नुत विजयवसन्त तोषिते
सकलामरसुरवन्दिते
सकलाम्नायप्रतिपादिते
अगणितमहिमशोभिते
अगस्त्यमुनिपूजिते आगमविदिते

✠ ✠ ✠ ✠ ✠

# ७७ शङ्करि सदानन्दलहरि

रागं : मालवि ताळं : आदि

*पल्लवि*

शङ्करि सदानन्दलहरि पाहि
शिवानन्दकरि श्रीगिरिराजकुमारि

*अनुपल्लवि*

शरदिन्दुवदने सुमनोहरि
शङ्करगुहमोदे श्रीविद्या रूपिणि
शाकम्बरि शातोदरि
शापविमोचनकरि श्यामलसुन्दरि

*चरणम्*

अनाथरक्षकि बृहन्नायकि
अनादिगुरुसंप्रदायदर्शकि
सरसीरुहासनसुमनोल्लासिनि
सहस्रकिरणादिसुरगुणपालिनि
सहस्रसूर्यप्रकाशिनि
अहर्निशि कैवल्यानन्ददायिनि
अहन्तातीतमनोन्मणि

✠ ✠ ✠ ✠ ✠

# ७८ श्रीगायत्रीदेवि

रागं गमनश्रम ताळं : चतुरश्र ध्रुवम्

*पल्लवि*

श्रीगायत्रीदेवि वेदमातृस्वरूपिणि मां पाहि

*अनुपल्लवि*

श्रीसावित्रीसरस्वतीशक्त्यादिसंसेविते ललिते
श्रीकण्ठदयिते श्रीपतिप्रमुखसन्ध्योपासितमूर्ते
श्रीविद्या मन्त्ररहस्यवेदिते अजपसुप्रीते[२२]

*चरणम्*

मुक्ताविद्रुमादिकान्तियुते पञ्चतेजोमयशोभिते
मुमुक्षुसर्वसंपत्प्रदानासक्ते सरसिजपीठवासिते
भक्ताभयप्रदाननिरते कामिकामितफलदानविख्याते
भगवति दशभुजालंकृते कपालादियुतकरशोभिते
भर्गदेववरेण्यानुग्रहिते बुद्धिविकासप्रचोदिते
परब्रह्म गमनश्रम हितकारिणि कल्याणि

✠ ✠ ✠ ✠ ✠

[२२]सुजनसंप्रीते

# ७९ श्रीचक्रपुरनिवासिनि

रागं : शुद्धललित ताळं : आदि

*पल्लवि*

श्रीचक्रपुरनिवासिनि अम्ब
श्रीराजराजेश्वरि मामव

*अनुपल्लवि*

श्रीकण्ठदयिते शैलजाते
श्रितजनपारिजाते शुद्धललित शुभ्रहारविराजिते

*चरणम्*

कामाकर्षिण्यादिचतुर्दशकामिनीसंसेवितमहामाये
काश्मीरादिकुमार्यान्तपुण्यक्षेत्रवासरते
कश्यपविनुत श्रीविद्ये सङ्गीतशास्त्रविशारदतोषिते

✠ ✠ ✠ ✠ ✠

# ८० श्रीचामुण्डेश्वरि देवि

रागं : कन्नड ताळं : आदि

*पल्लवि*

श्रीचामुण्डेश्वरि देवि तव पदभक्तिं देहि
वाचामगोचरे वाञ्छितफलप्रदकरे मे मुदं देहि

*अनुपल्लवि*

राजराजेश्वरीतिविख्याते श्रीविद्या सुगुणभरिते
विजयकाञ्चीपुरवरनिलये श्रीमहात्रिपुरसुन्दरि
श्रीमच्चक्रेश्वरि श्रीमन्त्रेश्वरि

*चरणम्*

मदनमोहनकरसुन्दरवदने मदनवैरिमानससदने
तदात्म्यभावयुतयोगिहृत्कमलभवने मन्दहसने
महादेवसंमोहनकरशिवशक्तिरूपिणि महदादि-
षट्त्रिंशत्तत्वस्वरूपिणि वर कन्नड रागसन्तोषिणि
अहं ब्रह्मास्मीति तत्वमन्त्रोपासिते
अहर्निशं ऊर्ध्वरेतो योगिवरेण्यचिन्तिते
महामहिमविदितशुभचरिते

✠ ✠ ✠ ✠ ✠

# ८१ श्रीचामुण्डेश्वरीं भज रे

रागं : षड्विधमार्गिणि ताळं : आदि

*पल्लवि*

श्रीचामुण्डेश्वरीं भजरे रे मानस
वाचामगोचरमहिमान्वितां शङ्करीम्

*अनुपल्लवि*

श्रीचक्रान्तर्गतां विचित्रचरिताम्
श्रीचन्द्रशेखरवामङ्कशोभिताम्
विचारपरहृदयस्थिताम्

*चरणम्*

सुरार्चितां श्रीविद्यां परदेवतां
पुराणेतिहासादिप्रतिपादिताम्
शर्वादिप्रणवलिङ्गनायकीं
भूम्यादिचतुर्दशलोकरक्षकीं
स्वरात्मिकार्थस्वरूपिणीं चित्स्वरूपिणीम्
षड्विधमार्गिणीम्

✠ ✠ ✠ ✠ ✠

# ८२ श्रीचामुण्डेश्वरीं भजेऽहम्

रागं : मध्यमावति    ताळं : आदि

*पल्लवि*

श्रीचामुण्डेश्वरीं भजेऽहं सततम्
सच्चिदानन्दलहरीं विमलेश्वरीं त्रिपुरसुन्दरीम्

*अनुपल्लवि*

श्रींकाररूपिणीं जगन्मोहिनीम्
हृदयाकाशनिवासिनीम्
स्वररूपिणीं हृत्सुखायोगिनीम्
दानवमदभञ्जनीं महिषासुरमर्दिनीम्

*चरणम्*

मायामयीं यदुकुलजननीं चिन्मुद्राप्रियां
महाबलाद्रिराज्ञीं नागलिङ्गोपासितकुण्डलिनीम्
मनोन्मनीं योगिध्यानगम्यां नवाक्षरात्मिकां
मध्यमावती प्रियां तुर्यात्मिकां जयाभिमानदेवीं
श्रीविद्यां चित्प्रभानन्दराजयोगीन्द्रकुलदेवीम्

✠ ✠ ✠ ✠ ✠

# ८३ श्रीराजराजेश्वरि

रागं : ललित ताळं : रूपकम्

*पल्लवि*

श्रीराजराजेश्वरि आश्रयामि शुभदां
ललितां हृल्लेखमणीं सदा

*अनुपल्लवि*

श्रीविद्या तत्त्वशक्तीं महाषोडशीं
श्रीपतिशिवविरिञ्चाद्युपासितमन्त्रमयीं जगन्मोहिनीम्

*चरणम्*

सर्वसंपत्प्रदायिनीं नवावरणश्रीचक्रवासिनीं
सदयां लोपामुद्रपत्यागस्त्यादिमहामुनिपुंगवपूजित
षडाधाराम्नायक्षेत्रस्थितां
श्रीनागलिङ्गप्रियां भ्रमराम्बिकां
श्रीविद्या चित्प्रभानन्दराजयोगीन्द्रवन्दिताम्

✠ ✠ ✠ ✠ ✠

# ८४ श्रीराजराजेश्वरि

रागं : गरुडध्वनि ताळं : मिश्र झम्पे

*पल्लवि*

श्रीराजराजेश्वरि श्रीवागीश्वरि
शृङ्गारलहरि श्रीरमामनोहरि

*अनुपल्लवि*

श्रीकरस्थलवासिनि श्रितजनपालिनि
शृङ्गगिरिभूषिणि श्रीशैलविहारिणि
श्रीमति सरस्वति सारमति सुदति

*चरणम्*

क्षीरसागरमथनोद्भवे कञ्जदळनयने
सुरवरबृन्दमनोहरे पद्मनिभपादे
वीरसंसेविते एकान्ते सोहंभावपूजिते
वरलक्ष्मि हिरण्मयरूपे हरिणि शिववामात्मिके
हिरण्यादिसर्वगर्भस्थे हरदेहार्धाङ्गवासस्थे
तारकरूपे गरुडध्वनि भूषिते हरिद्राकुंम्कुमार्चिते

✠ ✠ ✠ ✠ ✠

# ८५ श्रीराजराजेश्वरीम्

रागं : देवगान्धारि ताळं : आदि

*पल्लवि*

श्रीराजराजेश्वरीं सदा भजरे रे मानस
श्रीललितां महात्रिपुरसुन्दरीं कौमारीम्

*अनुपल्लवि*

क्षीरादिसप्तसागरावृतश्रीचक्रपुराधीश्वरीं
क्षित्यादिशिवान्तषट्त्रिंशत्तत्त्वस्वरूपिणीम्
हराद्युपासित श्रीविद्या स्वरूपिणीं
देवगान्धारि सन्तोषिणीं दाक्षायिणीं

*चरणम्*

परमपवित्रयदुकुलशेखरलीलावतारकृष्णसहजातां
पद्मरागवैडूर्यमरकतादिमहामणिविभूषिताम्
सुरवरसंपूजितकोमलकरपादपङ्कजसंशोभितां
सुरभिकामधेनुकल्पवृक्षादिदेववैभवविराजितां
पद्माकारमहापीठशोभितां अचिन्त्यानन्त[२३]सुगुणभरिताम्

✠ ✠ ✠ ✠ ✠

[२३] अभेद्यानन्त

# ८६ श्रीललिताम्

रागं : नागध्वनि ताळं : खण्ड त्रिपुट

*पल्लवि*

श्रीललितां महात्रिपुरसुन्दरीं भजेहं
श्रीराजराजेश्वरीं श्रीविद्यात्मकभुवनेश्वरीम्

*अनुपल्लवि*

श्रीचक्रान्तर्गतनवावरणधृतां शङ्करीं
श्रीकेशवादिचत्वारिंशत्तत्वन्यासमातृकेश्वरीम्
श्रीबीजाक्षरसमुपासितमहेश्वरीं
श्रीकरीं एकान्तमनोलयकरीम्

*चरणम्*

दूर्वासाद्यर्चितगुप्तयोगिनीं
दूर्वादिपत्रपुष्पार्चनतोषिणीम्
पूर्वार्जितपुण्यफलप्रदायिनीं
पूर्वादिचतुराम्नायमध्यवर्तिनीं
शर्वाणीं शुम्भनिशुम्भमहिषासुरादिभञ्जनीं
नागद्ध्वनि रागिणीम्

✠ ✠ ✠ ✠ ✠

# ८७ श्रीललिते

रागं : लताङ्गि ताळं : त्रिश्र त्रिपुट

*पल्लवि*

श्रीललिते श्रीकण्ठसहिते
श्रीचक्रान्तर्गते नमस्ते

*अनुपल्लवि*

श्रीपुरवासिनि त्रिलोकजननि
श्रितजनपालिनि मनोन्मणि
श्रीविद्या महामन्त्रपूते
श्री लताङ्गी रागहिते

*चरणम्*

पर्वतराजकुमारि परमेश्वरि
पर्वकालार्चितमहात्रिपुरसुन्दरि
परमपवित्रकरश्रीगायत्रि
परतत्वाधीश्वरि श्रीराजराजेश्वरि
नवावरणमध्यवासिनि नादबिन्दुकलास्वरूपिणि

✠ ✠ ✠ ✠ ✠

# ८८ श्रीविद्यामोदिनी

रागं : कोकिलभाषिणि    ताळं : त्रिश्र त्रिपुट

*पल्लवि*

श्रीविद्यामोदिनी पाहि मां लोकजननी

*अनुपल्लवि*

श्रीविशालाक्षि श्रीकामाक्षि
श्रीविमलेश्वरि शङ्करि श्रीमहात्रिपुरसुन्दरि
श्रीराजराजेश्वरि प्रणतशुभकरि

*चरणम्*

देवि दाक्षायणि तव चरणकमलसेवानिरत-
देवप्रमुखनिखिलसुखदायिनि कोकिलभाषिणि
रवीन्द्रवंशोत्पन्नसावर्णिवरप्रदायिनि
रविचन्द्रकुलोद्भवराजाधिराजार्चितमहायोगिनि
दिवस्पतितेजोलज्जाकरि जगदीश्वरि
जरामरणक्लेशपाशमोचनकरि श्रीवागधीश्वरि

✠ ✠ ✠ ✠ ✠

# ८९ श्रीविद्यां ललिताम्

रागं : नादब्रह्मम् ताळं : आदि

*पल्लवि*

श्रीविद्यां ललितां प्रणामामि
श्रितजनकल्पलतां शुभचरिताम्

*अनुपल्लवि*

सर्वसंपत्प्रदां बृहदानन्दां
सर्वलोकपूजितपदां शर्वहृत्सुखप्रदां कैवल्यदाम्

*चरणम्*

ईशादिवीरावळीपञ्चब्रह्ममयीं
ईकाररूपसुशोभितशिवमयीम्
ईशानसर्वविद्यास्वरूपयुतां
ईशसेवानिरतां दरहासयुतां
वीशवाहसहोदरीं नादब्रह्म वशंकरीं शङ्करीम्

✠ ✠ ✠ ✠ ✠

# ९० श्रीविद्ये पाहि

रागं : ललितपञ्चमम् ताळं : आदि

*पल्लवि*

श्रीविद्ये पाहि मुदं देहि
श्रीराजराजेश्वरि भुवनेश्वरि

*अनुपल्लवि*

रविचन्द्रादिनुतचरणयुगळे
अविद्यामूलहरणशीले बाले
अविभक्तभक्तपालनासक्ते सुगुणभरिते ललिते

*चरणम्*

नामरूपातीते श्रीकान्ते नागलिङ्गकुण्डलीशहिते
नामपारायणसुप्रीते नगराजसुते नारदादिनुते
कामकलास्वरूपयुते सागरतरङ्गगम्भीरध्वनियुते
कामाक्षीत्यादिनामाङ्किते ललितपञ्चम रागतोषिते

✠ ✠ ✠ ✠ ✠

# ९१ सुज्ञानदायिनीम्

रागं : शुद्धसाळवि ताळं : आदि

*पल्लवि*

सुज्ञानदायिनीं वन्दे सदा नादविनोदिनीम्

*अनुपल्लवि*

सुजनपालिनीं सुमतीं सुन्दरीं
सुजनकामधेनुस्वरूपिणीं सुमित्रां सावित्रीम्

*चरणम्*

अनन्तानन्तकोटिपशुजनगणयुतब्रह्माण्डनायिकां
सनकादिमहामुनिपूजितबृहदानन्दनायिकाम् ॥ १ ॥

अरिष्टापहरणकार्यनिरतां पशुपतिप्रियनायिकां
अशेषशास्त्रप्रतिपादितां प्रकृत्यात्मिकां बृहन्नायिकाम् ॥ २॥

अमरगणवन्दितपदां अजामेकामितिसुप्रसिद्धां
विमलात्मिकां श्रीविद्यां आद्यां विजय शुद्धसाळवी प्रियाम् ॥ 3॥

✠ ✠ ✠ ✠ ✠

# १२ सुरनन्दिनीम्

रागं : सुरनन्दिनि ताळं : देशाअदि

*पल्लवि*

सुरनन्दिनीं मनोन्मणीं
सुरासुरार्चितमानिनीम्

*अनुपल्लवि*

हरकामिनीं नारायणीं
विरागिणीं योगिहृत्कमलवासिनीं
महिषासुरमदभञ्जनीम्

*चरणम्*

असमानविक्रमदर्शनकरीं
असमर्थकार्यसमर्थनकरीम्
वासवादित्यसन्नुतेश्वरीं
अनादिशिवसहितां अंबां परदेवातां श्रीविद्या न्तर्गताम्
अनाहतादिषट्कमलान्तस्थितां
अपारकरुणारसभरिताम्

✠ ✠ ✠ ✠ ✠

# ९३ सुवर्णाङ्गि राजमातङ्गि

रागं : सुवर्णाङ्गि    ताळं : मिश्र झम्पे

*पल्लवि*

सुवर्णाङ्गि राजमातङ्गि शिवार्धाङ्गि
हीरमणिमयाङ्गि जगन्मोहनाङ्गि

*अनुपल्लवि*

सुरथराजकैवल्यप्रदायिनि
सुप्रसिद्धनवाक्षरबृहन्नायकि
सुरदानवादिविनुते सत्यज्ञानानन्त-
सच्चिदानन्दपदसंशोभिते

*चरणम्*

कामेशमनोहरि सरसाङ्गि
कामकोटिपीठनिलये रत्नाङ्गि
कामाक्षि कान्तामणि मातङ्गि
कामवैरिमोहनकरि हेमाङ्गि
वामदेवादिपञ्चवक्त्रेश्वरवामाङ्गवासिनि
श्रीविद्यान्तरङ्गनिवासिनि

✠ ✠ ✠ ✠ ✠